# Navagraha kavacha

## નવગ્રહકવચમ્

## Document Information

Text title : navagrahakavacham

File name : navagrahakavacham.itx

Category : kavacha, navagraha

Location : doc_z_misc_navagraha

Transliterated by : Ram Sankar Bhattacharya ramsankar.bhattacharya at gmail.com

Proofread by : Ram Sankar Bhattacharya ramsankar.bhattacharya at gmail.com, PSA Easwaran

Description-comments : grahayAmala tantra

Latest update : August 17, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# નવગ્રહકવચમ્

બ્રહ્મોવાચ ।
શિરો મે પાતુ માર્તાણ્ડો કપાલં રોહિણીપતિઃ ।
મુખમઙ્ગારકઃ પાતુ કણ્ઠશ્ચ શશિનન્દનઃ ।
બુદ્ધિં જીવઃ સદા પાતુ હૃદયં ભૃગુનન્દનઃ ।
જઠરઞ્ચ શનિઃ પાતુ જિહ્વાં મે દિતિનન્દનઃ ।
પાદૌ કેતુઃ સદા પાતુ વારાઃ સર્વાઙ્ગમેવ ચ ।
તિથયોઽષ્ટૌ દિશઃ પાન્તુ નક્ષત્રાણિ વપુઃ સદા ।
અંસૌ રાશિઃ સદા પાતુ યોગાશ્ચ સ્થૈર્યમેવ ચ ।
ગુહ્યં લિઙ્ગં સદા પાન્તુ સર્વે ગ્રહાઃ શુભપ્રદાઃ ।
અણિમાદીનિ સર્વાણિ લભતે યઃ પઠેદ્ ધ્રુવમ્ ॥

એતાં રક્ષાં પઠેદ્ યસ્તુ ભક્ત્યા સ પ્રયતઃ સુધીઃ ।
સ ચિરાયુઃ સુખી પુત્રી રણે ચ વિજયી ભવેત્ ॥

અપુત્રો લભતે પુત્રં ધનાર્થી ધનમાપ્નુયાત્ ।
દારાર્થી લભતે ભાર્યાં સુરૂપાં સુમનોહરામ્ ।
રોગી રોગાત્પ્રમુચ્યેત બદ્ધો મુચ્યેત બન્ધનાત્ ।
જલે સ્થલે ચાન્તરિક્ષે કારાગારે વિશેષતઃ ।
યઃ કરે ધારયેન્નિત્યં ભયં તસ્ય ન વિદ્યતે ।
બ્રહ્મહત્યા સુરાપાનં સ્તેયં ગુર્વઙ્ગનાગમઃ ।
સર્વપાપૈઃ પ્રમુચ્યેત કવચસ્ય ચ ધારણાત્ ॥

નારી વામભુજે ધૃત્વા સુખૈશ્વર્યસમન્વિતા ।
કાકવન્ધ્યા જન્મવન્ધ્યા મૃતવત્સા ચ યા ભવેત્ ।
બહ્વપત્યા જીવવત્સા કવચસ્ય પ્રસાદતઃ ॥

ઇતિ ગ્રહયામલે ઉત્તરખણ્ડે નવગ્રહ કવચં સમાપ્તમ્ ।

Encoded and proofread by Ram Sankar Bhattacharya
ramsankar.bhattacharya at gmail.com
Proofread by PSA Easwaran

*Navagraha kavacha*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*